# Shri Bhringi Stava

# શ્રીભૃઙ્ગીસ્તવઃ

## Document Information

Text title : Shri Bhrringi Stava 02 56

File name : bhRRingIstavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-56

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# શ્રીભૃઙ્ગીસ્તવઃ

શમ્ભો શઙ્કર શાન્ત શાશ્વત શિવ સ્થાણો ભવોમાપતે
ભૂતેશ ત્રિપુરાન્તક ત્રિનયન શ્રીકણ્ઠ કાલાન્તક ।
શર્વોગ્રાભય ભર્ગ ભીમ જગતાં નાથાક્ષર શ્રીનિધે
રુદ્રેશાન મહેશ્વરેશ્વર મહાદેવેશ તુભ્યં નમઃ ॥ ૧॥

સ્વામિન્ સર્વજગદ્ગુરો હર મહાલીલાક્ષમક્ષેત્રસ-
ચ્ચિદ્રૂપાખિલભવ્યભૂતભવતાં નાથ પ્રપન્નાર્તિહન્ ।
પાપઘ્નાશુભદુઃખપાશભયહૃદ્ભક્તેષ્ટદ જ્ઞાનદ
શ્રીદાતર્ક્ર્ય ષડઙ્ગમોક્ષદ મહાયોગીશ તુભ્યં નમઃ ॥ ૨॥

ક્રૂરં કષ્ટતમં વિનષ્ટમનસં ભ્રષ્ટં શઠં નિષ્ઠુરં
નિર્લજ્જં કૃપણં કૃતઘ્નમશુચિં બહ્વાશિનં હિંસકમ્ ।
આશાપાશશતપ્રબદ્ધમનસં દુષ્કીર્તિભાજં જડં
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩॥

મૂર્ખં બાલમતં સ્વધર્મચલિતં ધર્માર્થહીનં ખલં
કામાન્ધં ક્ષણિકં કદર્થનપરં દૌઃશીલ્યજન્મસ્થલમ્ ।
અજ્ઞં લુબ્ધમસત્યનિષ્ઠમધમં પ્રજ્ઞાયશોવર્જિતં
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪॥

ક્ષુદ્રં દુર્ભગમલ્પસત્ત્વમલસં ભગ્નવ્રતં રાગિણં
ભીરું ડામ્ભિકમીર્ષ્યકં વ્યસનિનં પાપાત્મકં સૂચકમ્ ।
આધિવ્યાધિનિપીડિતં જડધિયં સદ્ભિઃ સદા નિન્દિતં (હતધિયં)
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫॥

આકાઙ્ક્ષાશ્રયમાર્યવૃત્તિવિમુખં ક્ષીણં ગુણદ્વેષિણં
ધૂર્તં દુર્ગુણમત્યશુદ્ધહૃદયં સર્વત્ર સન્દેહિનમ્ ।
હીનં પાપરતં સમસ્તવિષયેષ્વાસક્તમન્યાયિનં
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૬॥

અશ્રદ્ધં ગતપૌરુષં કુપથગં જાજ્વલ્યમાનં રુષા
    સંસારાર્ણવમગ્નમૂર્મિનિહતં નીચક્રિયં નિર્દયમ્ । (ઊર્મિતરલં, નીચપ્રિયં)
વૈરાગ્યવ્રતદાનયોગનિયમદ્વેષ્ટારમુન્માદિનં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૭॥

દ્વન્દ્વગ્રસ્તમશસ્તવૃત્તિકુશલં સત્સઙ્ગવિદ્વેષિણં
    દુઃસઙ્ગપ્રિયમપ્રતિષ્ઠવચનં કામાતુરં તસ્કરમ્ ।
શૈવજ્ઞાનપરાઙ્મુખં ખલજનવ્યાપારપારઙ્ગતં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૮॥

સ્વપ્નેઽપ્યુત્તમગન્ધપુષ્પનિકરૈરીશાર્ચનાવર્જિતં
    ધ્યાનધ્યેયવિચરાણાકુલરિપું તુચ્છં મદોચ્છૃઙ્ખલમ્ ।
દારિદ્યાસ્પદમાત્મવૈરિવિશગં તાપત્રયસ્યાશ્રયં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૯॥

દુર્મર્યાદમતિપ્રવૃદ્ધરજસં સદ્વૃદ્ધસેવારિપું
    સદ્ધર્માધ્વસમુત્સુકં ગુરુજને માન્યેષુ ચાત્યુદ્ધતમ્ । (સદ્ધર્મેષ્વસમુત્સુકં)
શિષ્ટાનિષ્ટકરક્રિયાપરિચિતં દુષ્ટપ્રતુષ્ટિપ્રદં (દુષ્ટસ્ય તુષ્ટિ)
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૦॥

આત્માતિસ્તુતિકારિણં પરમહાનિન્દાકરં નિન્દિતં
    લુણ્ટાકં પતિતં વિપર્યયગતસ્વાન્તં સદા યાચકમ્ ।
વૈફલ્યોપગતસ્વકાર્યનિચયં સર્વાપદાં સઞ્ચયં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૧॥

કૃત્યાકૃત્યવિચારવર્જિતમતિં વ્રાત્યં મહા પાતકં (મહા વઞ્ચકમ્)
    દુર્બુદ્ધિં મદમાનમત્સરનિધિં દુર્વૃત્તિવૃત્ત્યાશ્રયમ્ ।
મિથ્યાજ્ઞાનિનમાર્યકણ્ટકમલં લોકદ્વયે દુઃખિતં (લોકત્રયે દૂષિતમ્)
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૨॥

દુષ્કર્મપ્રચયપ્રભિન્નહૃદયં ક્લેશૈશ્ચ સમ્પીડિતં
    (પ્રચયે પ્રહૃષ્ટ, સમ્પિણ્ડિતં)
    ચાર્વાકં કુમતિં કુચેલમલસં કાર્પણ્યજન્મસ્થલમ્ । (કુચેલમલિનં)
ભાર્યાપુત્રગૃહાદિસક્તમનસં ગામ્ભીર્યધૈર્યચ્યુતં (ધૈર્યદ્વિષં)
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૩॥

ચિત્તક્ષોભકરં કલહ્રુહૃદયં શોકાસ્પદં લોલુપં
    સારાસારવિચારહીનમનસં નીચપ્રિયં નીરસમ્ ।
મત્તોન્મત્તનિકૃષ્ટકષ્ટચરિતં શૂન્યં વૃથાલાપિનં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૪॥

આત્મજ્ઞાનવિહીનમાત્મવિમુખં સર્વાત્મભાવદ્વિષં
    સઙ્કલ્પૈર્બહુભિર્વિ ભિન્નહૃદયં દૈત્ય(ન્ય)પ્રસક્તં સદા ।
મર્મચ્છિદ્વચનં કઠોરહૃદયં મિત્રદ્રુહં ચુમ્બકં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૫॥

વેદોક્તાચરણે શિગા(ધ્રુગા)ત્મચરિતં સ્વેચ્છાપ્રવૃત્તિં સદા
    સચ્છાસ્ત્રેષ્વપરાગિણં પ્રિયતમાલક્ષ્મીગુણૈર્વેષ્ટિતમ્ ।
દાક્ષિણ્યપ્રતિપન્નતાવિરહિતં સ્વાર્થૈકનિષ્ઠં સદા
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૬॥

સત્યત્યાગદયાક્ષમાશમદમાદ્યાર્થાનભિજ્ઞાત્મકં
    દેવબ્રાહ્મણગોત્રજાતિથિપિતૃજ્ઞાનાત્મકાપૂજકમ્ ।
વિશ્વસ્તેષ્વપકારવઞ્ચનપરં મૈત્રીરિપું દુર્જનં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૭॥

કૃત્વાધર્મમતિં કથઞ્ચિદપરઃ કો મત્સમોઽસ્મિન્ ભવે-
    દિત્યેવં બહુજલ્પિનં કુપુરુષં ભ્રાન્ત્યાશ્રયં રાક્ષસમ્ । (ભ્રાન્ત્યા સ્થિતં)
દૃષ્ટાદૃષ્ટસુખૈષિણં બત મુધા મુક્ત્વા શિવારાધનં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૮॥

માર્જારાખુબકશ્વકુક્કુટકપિક્રોડાહિવૃત્તિં સદા
    તીર્થધ્વાઙ્ક્ષમનર્થકં પરસુખે સન્તાપિનં દુઃસહમ્ ।
ત્યક્તોપાયમમેયકાઙ્ક્ષિણમહો શુણ્ઠં ચ ચોરોપમં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૧૯॥

અસ્પૃશ્યં વિકલં કદર્યમખિલે દોષે સ્વકીયે ગુણં
    પશ્યન્તં ચલમાત્મકાર્યનિરતં ત્યાજ્યં વિષાદાત્મકમ્ ।
ચિન્તાશોકપરીતચેતસમલં સર્વાશુભાનાં પદં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૦॥

દુષ્પૂરસ્વકકુક્ષિપૂરણપરં ભારં ભુવઃ કેવલં
    ડાસી(દાસી)મેષખરસ્વભાવમપટું સન્માનનાભાજનમ્ ।

રિક્તં બાલકદીર્ઘસૂત્રિણમલં હૃચ્છલ્યશીલં સદા (તિક્તં બાલક)
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિમામ્ ॥ ૨૧॥

કર્માખ્યાલઘુભારવાહનપશું તૃષ્ણાતૃણગ્રાહિણં (દુષ્કાર્યાલઘુ)
સંસારાર્ણવદુઃખપઙ્કપતિતં યાન્તં ત્વધોઽધો ભૃશમ્ ।
સ્વત્વાહન્ત્વમમત્વમોહમકરૈરાકૃષ્યમાણં સદા
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૨॥

ભ્રષ્ટં સર્વજુગુપ્સિતં પરહિતવ્યાઘાતિનં તામસં
સમ્ભ્રાન્તં ચપલં વિધાનવિહિતવ્યાપારવિદ્વેષિણમ્ ।
શમ્ભો ત્વત્પદભક્તિહીનમદૃઢં સમ્મૂઢમાત્મદ્વિષં
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૩॥

જ્યેષ્ઠાવાસમતિપ્રમાદિતમતિં ક્ષુત્તૃડ્જરાદ્યર્દિતં
સ્વપ્નેઽપ્યલ્પપરોપકારરહિતં સર્વાહિતં દુર્બલમ્ ।
લોકે સત્પરિહાર્યનિન્દિતમહાદુઃખપ્રદૈકક્રિયં
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૪॥

કિં વાચાં બહુવિસ્તરેણ ભગવન્ મત્સન્નિભો ભૂતલે
નાભૂન્નાસ્તિ ચ નો ભવિષ્યતિ પુમાન્નિર્ભાગ્યચૂડામણિઃ ।
તસ્માદીદૃશમાત્મવઞ્ચકમહો ત્રૈલોક્યચૂડામણે
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૫॥

સર્વશ્રેષ્ઠ ગુણૈકભાજન વિભો સર્વોત્તમેષૂત્તમા-
સઙ્ખ્યેયાવગુણૈકભાજનમલં કષ્ટાતિકષ્ટક્રિયમ્ ।
શ્રીશાશ્રીશમતીન્દ્રિયેન્દ્રિયવશં નિઃસઙ્ગ દુઃસઙ્ગિનં
(શ્રીશં, અતીન્દ્રિય, નિસ્સઙ્ગ, ઇમાનિ સમ્બોધનાનિ)
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૬॥

વિણ્મૂત્રકૃમિમાંસશોણિતમયં મેદોઽસ્થિમજ્જાત્મકં
દુર્ગન્ધૈકનિધિં જરાપરિગતં વાતાદિદોષાત્મકમ્ ।
દૃષ્ટ્વાપિ સ્વશરીરમત્ર તુ સદા વૈરાગ્યહીનં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૭॥

ત્વક્શુક્લાન્ત્રસિરાતનૂરુહમયં કાલાસ્યરન્ધ્રસ્થિતં
નાનાપાયપતિષ્ણુકાલશિખિના પાપચ્યમાનં ભૃશમ્ ।
દૃષ્ટ્વાપિ સ્વકલેવરં કૃશતરં તત્રાવિરિક્તં પશું

કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૮॥

વિષ્ઠામૂત્રયુતં ત્વનિષ્ટમશુભં સ્વાભાવ્યતો નશ્વરં
કુષ્ટક્ષૈણ્યવિષૂચિકાજ્વરશિરઃશૂલાદિરોગાસ્પદમ્ ।
જ્ઞાત્વાપિ સ્વશરીરમત્ર તુ સદા વૈરાગ્યહીનં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૨૯॥

પઙ્ગુત્વાન્ધ્યજરિત્વમૌર્ખ્યખલતાબાધિર્યજન્મસ્થલં
ક્લેદચ્છેદવિશોષ્યદાહ્યકૃશતાસ્થૌલ્યસ્વભાવાત્મકમ્ ।
સમ્પશ્યન્નપિ દોષમત્ર તુ સદા સમ્પ્રીતિયુક્તં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૦॥

દેહં ક્ષાલનલેપનાદિવિધિના સંસ્પર્શયોગ્યં ત્વચા
છન્નક્લિન્નમહાવ્રણં નવમુખૈર્નિત્યં સ્રવન્તં મલમ્ ।
તં દૃષ્ટ્વાપ્યવિરાગિણં ચ નરકે નૂનં સરાગં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૧॥

લોકેઽત્યન્તપવિત્રતામુપગતં યત્પઞ્ચગવ્યાદિકં
યદ્દેહાંશકમસ્થિરોમરુધિરસ્નાય્વાદિસંસ્પર્શતઃ ।
સ્યાદેવાશુચિ તદ્વિબુધ્ય ચ સદા તદ્દેહસક્તં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૨॥

આત્માધારતયા સ્થિતાં નિજતનું બાલ્યે તથા યૌવને
વૃદ્ધત્વેઽપિ બહુપ્રકારવિકૃતિં પ્રાપ્તાં સમીક્ષ્યાપિ ચ ।
તત્રાનાત્મવિરાગિણં હ્યવિકૃતે સ્વાત્મન્યસક્તં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૩॥

સ્વસ્યાયુર્નિચયસ્ય મધ્યત ઇમૌ નિત્યં નિશાવાસકાં(વાસરૌ)
જાગ્રત્સ્વપ્નસુષુપ્તિષુ સ્થિતિમતોઽવસ્થાત્રયે ખણ્ડશઃ ।
ગચ્છન્તાવવબુધ્ય ચ સ્વહિતસત્કર્મણ્યસક્તં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૪॥

શુદ્ધાન્નસ્ય નિજાસ્યરન્ધ્રત ઇહાન્વાસ્ય દ્રવેણાધરે(?)
વિણ્મૂત્રાન્ત્રકફાસૃગાદ્યશુચિનિક્ષેપો ભવેદ્ભોજનમ્ ।
સ્ત્રીસઙ્ગોઽશુચિવર્ગલેપનમહો તત્રાપિ રક્તં પશું
કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૫॥

સર્પિઃખણ્ડપયોમધુપ્રભૃતિકં ત્યક્ત્વા તૃણાન્યત્તિ ગૌ-
    ર્યદ્વચ્છાશ્વતશાન્ત ઉત્તમ(ન્તિદોત્તમ) મહાનન્દાનપેક્ષં તથા ।
શમ્ભો વૈષયિકે સુખેઽતિવિરસે તુચ્છેઽતિસક્તં પશું
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૬॥

દેવાનામપિ મારુતસ્ય ચ વિભો ગમ્યં ન યત્તત્ર ચ
    સ્વૈરં ગચ્છતિ મન્મનો ન હિ કદાચિદ્વા તવ શ્રીપતે ।
ધર્તું તચ્ચ નિયન્તુમત્ર સુખદે નૈવાસમર્થં પશું
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૭॥

ગુહ્યે કુઙ્કુમગન્ધકાઙ્ક્ષિણમહો તોયાર્થિનં વા મરૌ
    તૈલાન્વેષિણમશ્મચૂર્ણનિચયે મૈત્ર્યર્થિનં દુર્જને ।
નિર્બુદ્ધિં ત્રિગુણાત્મકે મલવિધૌ ક્ષેત્રે સુખેપ્સું પશું (?)
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૮॥

વેદૈરપ્યખિલૈર્મહેશ બહુશો વેદાન્તશાસ્ત્રાદિભિ-
    ર્વ્યાપી ચિન્મય એક ઈશ્વર ઇતિ પ્રોક્તેઽત્ર યત્ત્વત્પદે ।
ચિત્તં ધર્તુમશક્તમાપ્તવચને વિશ્વાસહીનં પશું
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૩૯॥

બુદ્ધિજ્ઞાનદયાક્ષમાશમદમાસમ્મોહયત્વા(ત્વા)ર્જવ-
    ખ્યાત્યખ્યાતિભયાભયાસુખસુખાહિંસાદયસ્તુષ્ટયઃ ।
ભૂતાનાં તુ ભવત્ત એવ વિવિધા નિત્યં ભવન્તિ પ્રભો
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિમામ્ ॥ ૪૦॥

ભાવાભાવભવાભવામૃતવિષાસત્યાઃ સમસ્તાઃ(વિષાઃસત્યા અસત્યાઃ)ક્રિયાઃ
    દીર્ઘાયુષ્યનિરામયત્વનિખિલાભીષ્ટાર્થસંસિદ્ધયઃ ।
ભૂતાનાં ભવદિચ્છયૈવ ભગવન્ જાયન્ત એવ પ્રભો
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૧॥

યોગૈશ્વર્યસમસ્તદાનનિરતા(તિઃ) શ્રદ્ધાત્મભક્તિર્દૃઢા
    વૈરાગ્યં પરમં મહેશ પરમે ધર્મે રતિશ્ચારુતા ।
ભૂતાનાં ભવતઃ પ્રસાદત ઇહાજસ્રં ભવન્તિ પ્રભો
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૨॥

વાયુર્વાપિ(તિ)તવાજ્ઞયા શશિરવી નિત્યં જગદ્ભાસકા-
    વાહારં પચતીહ કુક્ષિસદને વહ્નિઃ સદા પ્રાણિનામ્ ।

દેવાનાં વહતીહ હવ્યમપિ યઃ પાકં કરોત્યાજ્ઞયા
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૩॥

બ્રહ્માદ્યાસ્તૃણનિગ્રહા ઇહ મહાભૂતાનિ તે શાસનાત્
    કુર્વન્ત્યત્ર સમસ્તદેહનિકરે પ્રાયસ્તવાજ્ઞાબલાત્ ।
તિષ્ઠન્ત્યધ્યવસાયમર્થનિકરે બુદ્ધિઃ કરોત્યાજ્ઞયા
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૪॥

ચિત્તં ચેતયતે મનસ્તુ સકલં સઙ્કલ્પયત્યાજ્ઞયા
    સર્વાર્થાનભિમન્યતે તવ મહાદેવાજ્ઞયાહઙ્કૃતિઃ ।
સ્વેષ્વેવેન્દ્રિયવર્ગ એષ વિષયેષ્વાસ્તે તવૈવાજ્ઞયા
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૫॥

બ્રહ્મા સૃષ્ટિકરો હરિઃ સ્થિતિકરો રુદ્રસ્તુ કાલાત્મકઃ
    સંહર્તા જગતાં શ્રિયં વિતરતિ શ્રીર્બ્રહ્મવિદ્યામુમા ।
સાવિત્રી ચ તવાજ્ઞયૈવ નરકાત્ સન્તારયત્યાશ્રિતાન્
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૬॥

કાલં(નાલં)ચાલયિતું તૃણં ચ પવનઃ શમ્ભો ત્વદાજ્ઞાં વિના
    દગ્ધું તન્ન સમર્થ એવ દહનશ્છેત્તું તુ વજ્રેણ તત્ ।
શક્તો ગોત્રભિદપ્યહો જગદિદં સર્વં ત્વદાજ્ઞાવશં
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૭॥

સેન્દ્રાઃ સર્વસુરાસુરાદય ઇહ ત્વચ્છાસને સંસ્થિતાઃ
    બ્રહ્માણ્ડાદિસમસ્તવસ્તુનિકરૈઃ સાધારણૈઃ સન્તતમ્ ।
ત્રૈલોક્યાનુગતાન્યપીહ સુબહૂન્યાજ્ઞાવશાન્યેવ તે
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૮॥

ભૂતાન્યાપ ઇહાજ્ઞયૈવ ભવતઃ સઞ્જીવયન્તિ પ્રભો
    વાચં વાગ્વિપુલાં દધાતિ જગતાં ધત્તેઽખિલં ભૂર્નભઃ ।
ભૂતાનામવકાશદં જલધયો નિમ્ને સ્થિતા દુઃસહાઃ
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૪૯॥

સૂતેઽસૌ મહદાદિકં પ્રકૃતિરપ્યાજ્ઞાવશાત્તે વિભો
    કાલશ્ચ પ્રકૃતિઃ પરા પુરુષ ઇત્યેતદ્ધિ સર્વં સદા ।
શમ્ભો દેવ ભવત્ત એવ જગતો ભૂતં ભવિષ્યદ્ભવત્
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫૦॥

ત્વન્માયાતિવિમોહિતં ભવ મહાલીલાર્થમેતત્ત્વયા-
    ત્તં ત્વત્પ્રેરણયૈવ સર્વવિષયેષ્વત્ર પ્રવૃદ્ધિં(દ્ધં) ચ તત્ ।
પાપધ્વાન્તરવે સમસ્તજગતાં દુઃખાન્તકારિન્ પ્રભો
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫૧॥

બન્ધચ્છેદવિધૌ ત્વમેવ ભુવનેષ્વેકઃ સમર્થો ધ્રુવં
    તત્પાશૈર્ભવ દૈવ(ભવતૈવ)બદ્ધમખિલં કર્મચ્છલેનાપિ ચ ।
શમ્ભો ત્વચ્છરણાગતં કરુણયા ત્વં શઙ્કરો યેન વા
    કારુણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫૨॥

અત્યાવેશિનમુત્તમસ્થિતિમતાં સન્ત્યાગિનં નાસ્તિકં
    રન્ધ્રાન્વેષિણમન્ધમૂકબધિરં શમ્ભોસ્તુ વિશ્વાત્મનઃ ।
માહાત્મ્યશ્રવણસ્તુતીક્ષણવિધૌ માહેશ્વરાવત્સલં
    કારણ્યાકર ભો પિતઃ પશુપતે દોષાકરં પાહિ મામ્ ॥ ૫૩॥

॥ ઇતિ શ્રીભૃઙ્ગીસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Aruna Narayanan

---

*Shri Bhringi Stava*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*